অভিসরণ / ABHISARON
A Multilingual International Peer-Reviewed Research Journal
Volume 1, Issue II, July 2026, PP. 134-137
www.abhisaron.com
ISSN-3139-4027(Online)
DOI - https://dx.doi.org/10.67757/abhisaron.2026.v1i2.018

# A Critical Study of Śabda Pramāṇa in Yoga Philosophy / योगदर्शने शब्दप्रमाणविचारः

**Chandrarekha Mahata**
**Ph.D. Scholar, Department of Sanskrit, Midnapore College Research Centre, in Humanities & Social Science**
**Email:** chandrarekha343@gmail.com

**Accepted: 05.07.2026**
**Published: 20.07.2026**

**Keywords:**
शब्दतत्त्वम्,
योगदर्शनम्,
शब्दप्रमाणम्,
नित्यः,
शब्दार्थसम्बन्धः।.

**Abstract:**

“अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते”[1]- इत्युक्तिनुसारेण इह जगति यत् किञ्चज्ञानं यत् किञ्चतत्त्वम् तत् सर्वं शब्देन एव अवभासते अवधीयते वा। शब्देन एव अर्थाववोधः जायते। शब्देन एव भावाभिवेगस्य प्रकाशो भवति। किं च शब्द एव अर्थापगुढः, शब्देन एव जगदिदं गतिशीलमिति धिया शब्दार्थतत्त्वविषये शब्दार्थसम्बन्धविषये च वहुषु शास्त्रेषु वहुविधं तात्त्विकं विवेचनं समुपपादितम्। शब्दप्रमाणविषये, शब्दस्यनित्यानित्यविषयविचारे शब्दार्थसम्बन्धविषये च अपि शास्त्रान्तरेषु विशेषतः दर्शनव्याकरणादिशास्त्रेषु शास्त्रीयम् अनुशीलनं प्रतिपाद्यते। ‘उच्चारणप्रध्वंसिनः वर्णाः’ इति धिया शब्दः अनित्यः इति नैयायिकाः, वैयाकरणदिशा शब्दः नित्यः योगदर्शनदिशा शब्दार्थयोः वाच्यवाचकभावलक्षणः सम्बन्धः नित्यः, नैयायिकदिशा शब्दार्थयोः सम्बन्धः अनित्यः, वैयाकरणदिशा तु शब्दः नित्यः अर्थः नित्यः तयोः सम्बन्धोऽपि नित्यः। प्रमाणपदार्थनिरूपणेऽपि शास्त्रकारेषु वहुविधं तात्त्विकचिन्तनं परिदृष्टं जायते। “आप्तोपदेशः शब्दः”[2] इति नैयायिकदिशा शब्दप्रमाणस्य लक्षणं प्रतिपाद्यते। सांख्यदर्शने “आप्तश्रुतिराप्तवचनम्”[3] इति लक्षणम् प्रतिपादितम्। मीमांसकदृष्ट्याऽपि आप्तवाक्यं हि शब्दः।

भगवता पतञ्जलिना महाभाष्ये शब्दस्य लक्षणविषये उक्तं यत् - “येनोच्चारितेन सास्नालाङ्गूलककुद्रखुरविषाणिनां सम्प्रत्ययो भवति स शब्दः । अथवा प्रतीतपदार्थको लोके ध्वनिः शब्द इत्युच्यते”[4] । योगदर्शने तु चत्वारि प्रमाणानि स्वीकृत्य शब्दस्य प्रामाण्यं स्वातन्त्र्येण समुपपादितम्। तदुक्तं व्यासभाष्ये - ‘स्व-बोधज्ञानार्थं तत्वज्ञानीपुरूषः आप्तोच्चारितशब्दमाध्यमेन य उपदिश्यते स आगमः इति[5]। पुनश्च योगदर्शने सूत्रकारेण तस्य वाचकः प्रणवः इति प्रतिपाद्य व्याकरणशास्त्रोक्त शब्दस्य ब्रह्मरूपत्वं स्वीकृतम् । विषयेऽस्मिन् शास्त्रकाराणाम् अभिमतानि अनुशील्य गवेषणात्मकेन मार्गेन समीक्षात्मकः विचारः शोधप्रवन्धेऽस्मिन् स्वविचारं विवेचनं प्रतिपाद्यते।

**Discussion:**

षड्विधेषु आस्तिकदर्शनेषु योगदर्शनं तदीयेन तत्वेन स्वातन्त्र्यम् आवहति। न केवलं शास्त्रीयदिष्ट्या अपि तु प्रत्यक्षरूपेण समाजस्य उपकारं साधयति। सम्यग् आधीयते चित्तम् अस्मिन् इति समाधिः चित्तस्य पञ्चभूमयः सन्ति - क्षिप्तम्, मूढम्, विक्षिप्तम्, एकाग्रम्, निरुद्धचेति। सूत्रकारेण भगवता पतञ्जलिना “योगश्चित्तवृत्तिनिरोधः"[6] इति सूत्रेण योगलक्षणं प्रस्तुतम् । चित्तवृत्तिनिरोधः इति लक्षणम्, योगः इति च लक्ष्यम्। वृत्तिनिरोधपरिज्ञानाय वृत्तिज्ञानम् अपेक्ष्यते । चित्तम् अन्तःकरणसामान्यम्, मनः बुद्धिः अहङ्कारश्चेति। त्रयाणां सामान्यसंज्ञा चित्तमिति। तस्य चित्तस्य पञ्चभूमयः अर्थात् अवस्थाविशेषाः सन्तिः । तत्र रजसा विषयेष्वेव वृत्तिमत् चित्तं क्षिप्तम्। तमसा निद्रादिवृत्तिमत् मूढम्। क्षिप्ताद्विशिष्टं विक्षिप्तम्। वैशिष्ट्वं च सत्वाधिक्येन समादधदपि चित्तं रजोमात्रया अन्तरा विषयान्तरवृत्तिमत् भवति इति। एकस्मिन् एव विषये अग्रम् अर्थात् शिखा यस्य चित्तदीपस्य तद् एकाग्रम्, निवातस्थदीपवत्। अर्थात् यस्मिन् स्थाने वातप्रकोपो नास्ति तत्रस्थदीपस्य शिखा यथा स्थिरा भवति तद्वत् एकाग्रभूमौ चित्तं स्थिरं भवति। निरुद्धसकलवृत्तिकं संस्कारमात्रशेषं चित्तं निरुद्धम् इति उच्यते। न केवलम् एतदपि तु प्रमाणविषयेऽपि तदीयं शास्त्रीयं चिन्तनं समुपपाद्यते। तद्दिशा प्रत्यक्ष-अनुमान-आगमः इति त्रीणि प्रमाणानि स्वीक्रियन्ते। यदुक्तं तत्र - “प्रत्यक्षानुमानागमाः प्रमाणानि”[7] इति त्रिषु प्रमाणेषु शब्दप्रमाणं स्वतन्त्ररूपेण स्वीकृतं योगदार्शनिकैः। अनुशीलनेन प्रतिभातं जायते यत् योगदर्शने शब्दस्य स्वातन्त्र्येण प्रामाण्यमभ्युपगतम्। तदुक्तं व्यासभाष्ये- 'स्व-बोधज्ञानार्थ तत्वज्ञानीपुरुषः आप्तोच्चारितशब्दमाध्यमेन य उपदिश्यते स आगम इति’[8]। पातञ्जलयोगदर्शन योगसूत्रकारेण "तस्य वाचकः प्रणवः"[9] इति सूत्रेण तस्य अर्थाद् ईश्वरस्य वाचकः शब्दः प्रणवः अर्थाद् आँकारः इत्युक्तम् । यतः प्रणवः ईश्वरस्य वाचकः अतः भाष्यकारेणोक्तं वाच्य ईश्वरः प्रणवस्येति, एतावता प्रणवः वाचकः ईश्वरश्च वाच्यः इति तयोः वाच्यवाचकसम्बन्धः इति सुस्पष्टं विज्ञायते। अत्र भाष्यकारेण प्रणवेश्वरयोः वाच्यवाचकसम्बन्धविषये विकल्पद्वयमुपस्थापितम् "किमस्य सङ्केतकृतं

वाच्यवाचकत्वमथ प्रदीपप्रकाशवदवस्थितमिति"[10]। अर्थात् प्रणवेश्वरयोः वाच्यवाचकत्वं संकेतजन्यं अथवा प्रदीपप्रकाशवत् अवस्थितम् अर्थात् प्रदीपप्रकाशितघटादिपदार्थवत् पूर्वत एव उपस्थितम्, अन्धकाराच्छन्ने विद्यमानः घटः प्रदीपेन यदा प्रकाशितो भवति तदा सः घटः पूर्वत एव वस्तुतः उपस्थितो भवति। पश्चात् प्रदीपेन घटः केवलं प्रकाश्यते। तथैव प्रदीपप्रकाशितघटादिपदार्थवत् प्रणवेश्वरयोः योऽयं वाच्यवाचकभावसम्बन्धः स पूर्वत एव स्थितो वर्तते पदपदार्थयोः इतरेतराध्यासरूपेण संकेतेन केवलं वाच्यवाचकभावसम्बन्धः द्योत्यते। अत एव भाष्यकारेण प्रणवेश्वरयोः वाच्यवाचकभावसम्बन्धः संकेतजन्यः संकेतद्द्योत्यो वा इति प्रश्नस्य समाधानं कुर्वता "स्थितोऽस्य वाच्यस्य वाचकेन सह सम्बन्धः"[11] इत्युक्तम् । अर्थात् वाच्यस्य ईश्वररूपस्यार्थस्य वाचकेन प्रणवरूपशब्देन सह सम्बन्धः स्थितः अर्थात् स्वाभाविकः नित्य इत्यर्थः । ईश्वरविषयकः संकेतस्तु पूर्वत एव विद्यमानं प्रणवेश्वरयोर्वाच्यवाचकभावरूपं सम्बन्धं द्योतयति। अत्रेदम् अवधेयं यत् वाच्यार्थः दद्योतितो न भवति वाच्यवाचकभावरूपः सम्बन्ध एव संकेतेन द्योतितो भवति वाच्यार्थस्तु वाचकशब्देन द्योत्यते। यथा पितापुत्रयोः जन्मत एवं विद्यमानं सम्बन्धम् अयमस्य पिता अयमस्य पुत्रः इति संकेतो द्योतयति ।

अत्रेदमवधेयं यत् कल्पप्रलयमहाप्रलयादिष्वपि अयं शब्दार्थसम्बन्धः अवस्थित एव भवति यतो हि वाचकः शब्दोऽपि अव्यक्तप्रकृतौ लीनो भवति न नश्यति, तस्य अव्यक्ते विद्यमानस्यैव शब्दार्थसम्बन्धस्य अभिव्यक्तिः ईश्वरसंकेतेन भवति, अयं च संकेतः अनादिः ईश्वरेच्छारूपः अत एव भाष्यकारेणोक्तम्- "सर्गान्तरेष्वपि वाच्यवाचकशत्क्त्यपेक्षस्तथैव सङ्केतः क्रियते"[12] अर्थात् अन्यासु सृष्टिष्वपि पूर्वसर्गे इव वाच्यवाचकशक्तिसापेक्षः अर्थात् तत्सम्बन्धानुकूलवाच्यवाचकभावप्रकाशकः संकेतः ईश्वरेण क्रियते। सम्प्रतिपत्तिनित्यतया अर्थात् सदृशव्यवहारपरम्परायाः नित्यत्वात् शब्दार्थसम्बन्धोऽपि नित्यो भवति। ईश्वरसंकेतेन प्रतिसर्गं स सम्बन्धः केवलं प्रकाश्यते यतो हि पूर्वसर्गे यो हि घटशब्दः घटार्थबोधकः आसीत् स एव घटरूपः शब्दः घटरूपश्चार्थः अव्यक्ते लीनः आसीत् अतः सर्गान्तरेऽपि स सम्बन्धः अभिव्यक्तो भवति घटशब्दश्च घटरूपेऽर्थे व्यवहृतो भवति, एतावता शब्दार्थयोः अयं वाच्यवाचकभावलक्षणः सम्बन्धः नित्य इति योगदर्शनस्य सिद्धान्तः। तदुक्तं भाष्यकारेण "सम्प्रतिपत्तिनित्यतया नित्यः शब्दार्थसम्बन्ध इत्यागमिनः प्रतिजानते"[13]।

**Reference:**

1. वा.प. ब्र. का-123
2. न्या. सू. सूत्र-7, पृ-57
3. सा.का.

.

4. म. भा.प.
5. व्यासभाष्यम्
6. पा.यो.सू., 1.2
7. योगदर्शनम्, का-7,पृ-42
8. व्यासभाष्यम्.
9. पा.यो.सू.-1.27
10. व्यासभाष्यम्, पा.यो.सू.-1.27
11. व्यासभाष्यम्, पा.यो.सू. 1.27
12. व्यासभाष्यम्, पा.यो.सू. 1.27
13. व्यासभाष्यम्, पा.यो.सू. 1.27

**Bibliography:**

1. गौड, ड. शशीबाला, दर्शनशास्त्रस्योतिहासः, चौखम्बा सुरभारती प्रकाशन, वाराणसी, 2021.
2. झा, ड. महेश, न्यायसूत्रम्, चौखम्बा सीरीज आफिस, वाराणसी, 2021.
3. त्रिपाठी, ड. रमाशङ्कर, सांख्यकारिका, चौखम्बा कृष्णदास आकादमी, वाराणसी।
4. वन्द्योपाध्यायः, श्री अशोककुमारः, पातञ्जलदर्शन, श्रीवलराम प्रकाशनी, कोलकाता - 700006.
5. भट्टाचार्य, श्रीविष्णुपद, वाक्यपदीय, पश्चिमवङ्ग राज्य पुस्तक पर्षद्, 2007.
6. श्रीवास्तव, ड. सुरेशचन्द्र, पातञ्जलयोगदर्शनम्, चौखम्बा सुरभारती प्रकाशन, 2012.
7. सेनगुप्त, श्रीमती सङ्घमित्रा, महाभाष्यम्, संस्कृत पुस्तक भाण्डार।

CC BY NC